श्रीसुरसरस्वतीसभा, शृङ्गेरी

प्रवेशपरीक्षा – प्रथमपत्रिका

दिनाङ्क:- ३१. १ .२०२१ पूर्वाह्ण: १०.००त: १.०० पर्यन्तम्

समय:- होरात्रयम् अङ्का: - १००

<u>सूचना - सर्वाणि उत्तराणि संस्कृते एव भवेयु:</u>

1. **अष्टानाम् एकवाक्येन उत्तरं लिखत।** 8

१. "अभिनवशङ्करा:" इति के प्रसिद्धा: ?

२. गङ्गावतरणस्य रचयिता क: ?

३. आर्. कृष्णमाचार्या: केन बिरुदा प्रख्याता: ?

४. भीष्मविजयं केन रचितम् ?

५. किरातार्जुनीयस्य प्रधानरस: क: ?

६. क: राजा आदित्यभक्त: बभूव ?

७. का साल्वम् अकामयत ?

८. युद्धे के भीष्मपक्षे अभवन् ?

९. कुशलवयो: क: ज्यायन् ?

१०. शङ्खचूडस्य कुलं किम् ?

2. **षण्णां वाक्यद्वयेन उत्तरं लिखत।** 12

१. समुद्रवेला कीदृशी वर्तते ?

२. मन्त्रोपनिषद् विषये गुरुपरम्परा का ?

३. अप्सरस: कुत: उच्चै: चुक्रुशु: ?

४. शिशुकलहमाकर्ण्य के के समागता: ?

५. भीष्मे भार्गवेण ताडिते किम् अभवत् ?

६. भैरवाचार्य: क: ? स: राज्ञे किं प्रेषयामास ?

७. राजा किमुक्त्वा सिद्धम् असान्त्वयत ?

८. हर्षजननसमये किं किम् अभवत् ?

3. त्रयाणां पञ्चषैः वाक्यैः उत्तरं लिखत। 9

१. 'जितोऽस्मि' इति उक्त्वा जामदग्न्यः शान्तनवं किम् उवाच ?

२. उर्वशीं भरतमहर्षिः कुतः शशाप ?

३. मदस्य अनर्थहेतुम् उपपादयत।

४. भैरवाचार्यः राजानम् उपह्वरे किम् अवादीत् ?

५. यशोवती का ? सा कथं भूता अभवत् ?

4. त्रयाणां ससन्दर्भं विवृणुत। 9

१. असुरक्षा हि बहुच्छला श्रियः।

२. यथा न प्रहस्यसे विटैः।

३. प्रायेण परोत्कर्षासहिष्णवो हि लोकः।

४. स्वतः प्रकाशानि आवयोः अस्त्राणि।

५. भुजे वीर्यं निवसति न वाचि।

5. एकस्य पद्यस्य सान्वयमर्थं लिखत। 4

१. जपदामकरो जटाधरः कलयन् काञ्चनवेत्रमुज्वलम्।
विचचार युवातिसुन्दरः भसितालेपनपाण्डरच्छविः॥

२. शयितेन मातुरङ्के विस्रब्धं शैशवे न तत्प्राप्तम्।
लब्धं सुखं मयास्या वध्यशिलाया यदुत्सङ्गे॥

6. श्लोकद्वयं पूरयत। 6

१. शान्त्याद्याः --------- मह्यम् ॥ २. शिवमौपयिकं ----------- जिगीषवः॥

३. समवृत्तिरुपैति -------- मेदिनीपतिः॥

7. एकस्य कवेः देश-काल-कृति-वैशिष्ट्य-विषये लिखत । 4

१. लक्ष्मणसूरिः २. भवभूतिः

8. चतुर्णां रूपाणि परिचाययत । 4

१. जीयाः २. पुरोधाः ३. आगामिन्याम्

४. तूर्याणि ५. अवनमय ६. वाग्भ्यः

9. चत्वारि पदानि संस्कृतवाक्येषु योजयत । 4

१. बालिशता २. प्राचेतसः ३ दारिकाभिः

४. परिहृत्य ५. ग्रन्यात् ६. महिमा

10. चतुर्णां पर्यायपदं लिखत । 4

१. अन्तरायः २. नभस्वान् ३. आयोधनम्

४. नीरधरः ५. सद्म ६. रोधः

11. चतुर्णां सन्धिं विभज्य सन्धिनाम लिखत। 6

१. रसोल्लासः २. तस्यासीत् ३. कविरिति

४. निश्चेतुमतीव ५. प्रत्यागमने ६. ध्वनिनैव

12. चतुर्णाम् एकपदं लिखत । 4

१. तरुणतृणविशिष्टदेशः २. अकुटिलयुद्धादिव्यापारः ३. शतक्रत्तोः इयम्

४. अन्तर्धानम् अगमत् ५. चन्दनद्रववत् ६. आश्चर्यं प्राप्तवान्

13. चतुर्णां व्याकरणविशेषं लिखत। 8

१. भगवते रोचते　　२. आदायचर:　　३. भवन्तमुपतिष्ठते

४. लोकमधितिष्ठति　　५. विनयन्ते　　६. वात्या

14. चतुर्णां विग्रहवाक्यानि विलिख्य समासनामानि लिखत। 8

१. रुचियुतम्　　२. मोक्षवाञ्छाम्　　३. गोत्रनामनी

४. तपोधन:　　५. अनुचरा:　　६. सप्तर्षय:

15. द्वयोः तत्तल्लकारस्य सर्वाणि रूपाणि लिखत। 6

१.अभिजगाम　　२. अस्तु　　३. सिषेवे

16. चतुर्णां रिक्तस्थानानि पूरयत। 4

१. अये पुष्पवृष्टि: ---------------------- च।

२. क: शरीरेण मे -------------------------।

३. भूयिष्टं ----------------अनयो: पश्यामि।

४. कदाचित् ----------अपि प्रमोदाय कल्पते।

५. ---------------------- ह्यविनीतसम्पद:।

----------------

श्रीसुरसरस्वतीसभा, शृङ्गेरी

प्रवेशपरीक्षा - द्वितीयपत्रिका

दिनाङ्क: - ३१. १ .२०२१ | अपराह्ण: १.३०त: ३.००पर्यन्तम्

समय: - सार्धैकहोरा | अङ्का: ५०

<u>सूचना - सर्वाणि उत्तराणि संस्कृते एव भवेयु:</u>

1. विषयद्वयं सोदाहरणं विवृणुत। 10

१. प्रयोगा:

२. अव्ययीभावसमास:

३. व्यतिरेकालङ्कार:

2. विषयद्वयं सोदाहरणं विवृणुत। 8

१. शालिनी

२. तत्पुरुषसमास:

३. सन्नन्तधातु:

3. त्रयाणां सर्वाणि रूपाणि तत्तल्लकारे लिखत। 9

१. शशाक २. शृणोति ३. आप

४. जह्यात् ५. क्रीणाति ६. कुरुते

4. चतुर्णाम् अन्यलिङ्गरूपाणि लिखत। 4

१. पठन् २. नयमानं ३. कारिका

४. गन्त्री ५. नायिका ६. दाता

5. द्वयो: प्रयोगं व्यत्यस्यत। 3

१. गोपाल: गां पय: दोग्धि। २. वामनेन बलि: वसुधां याच्यते।

३. गुरुणा माणवक: धर्मम् उच्यते। ४. गुरव: उपदेशं कुर्वन्ति।

6. त्रयाणां विग्रहवाक्यं विलिख्य समासनाम लिखत। 6

१. ग्रामगतः    २. पूजापुष्पम्    ३. सप्तर्षयः

४. विद्याधनम्    ५. ग्रामान्तरम्    ६. यथाशक्ति

7. मातृभाषया अनुवदत । 5

१. श्रीरामसदृशः शूरः त्रिलोक्यां न हि वर्तते ।

२. हनुमान् मध्येसमुद्रं सहसा समुत्थितं पर्वतमेकमपश्यत् ।

३. राजन्! आप्रसादं प्रत्यहं नन्दिन्याः परिचर्यां विधेहि ।

४. साधुवेषधारिभिः चोरैः बहवः धनिकाः धनानि अमुष्यन्त।

५. छात्राः यूयं सदा परेषां हितमेव कुरुत।

8. संस्कृतभाषायाम् अनुवदत | 5

1. ಇಂದು ನಾನು ಧಾನ್ಯಗಳನ್ನು ಮಾರಿ ಮುಂದಿನ ಸಪ್ತಾಹದಲ್ಲಿ ಕುದುರೆಯನ್ನು ಕೊಂಡುಕೊಳ್ಳುವೆ.

   Today I will sell the grains and purchase horse next week.

2. ಧಾರ್ಮಿಕನಾದ ರಾಜನು ತನ್ನ ಪ್ರಜೆಗಳನ್ನು ಚೆನ್ನಾಗಿ ರಕ್ಷಿಸುತ್ತಾನೆ.

   A righteous king takes good care of his citizens well.

3. ಪಾಪಿಗಳು ಪಾಪದ ಫಲಗಳನ್ನು ಅನುಭವಿಸಲೇಬೇಕು.

   The sinners should experience the fruits of the sin.

4. ಕವಿಗಳು ಶ್ರೇಷ್ಠಜನರ ಕೀರ್ತಿಯನ್ನು ಎಲ್ಲಾ ದಿಕ್ಕುಗಳಲ್ಲೂ ಹರಡುತ್ತಾರೆ.

   The poets spread the fame of great men in all directions.

5. ಸಜ್ಜನರು ತಮ್ಮ ಒಳ್ಳೆಯ ಚಾರಿತ್ರ್ಯವನ್ನು ಎಂದಿಗೂ ಬಿಡುವುದಿಲ್ಲ.

   Sadhus never give up their good character.

---